योगः कार्य इति सिद्धं भवति॥ इह च पितृपितामहग्रहणमुपलक्षणं पूर्वेषामिति सामान्येनोपक्रमात्॥ तेन सर्वत्र पितृ
मातृपितामही प्रपितामहीनामिति पितुर्मातामहमातृपितामहमातृप्रपितामहानामिति पितुः पत्न्याः पितुर्भ्रात्रादिरिसा
द्धेच प्रयोगः सिध्यति॥ एवमेव वृद्धदैवतत्वमेषां न पितामह प्रपितामहीसापत्नीनां मातृपितृव्या ..दीनां च शब्दविशेषा
द्धि .... धैदेवतात्वस्य विधेः पितृसंबंधिरूपपितृत्वाग्निनैव देवताहागमा .. त्॥ यत्तु स्वाधिकारं कर्मपि मातृमा
तामह पितृव्यादिवार्षिकादिश्राद्धं तन्मात्वाग्निनैव देव तात्वं॥ मातुः श्राद्धं सुतः कुर्यात् कुर्यान्मातामहश्राद्धं॥
का

19

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपुत्रस्यापि पितृव्यस्ये प्रातिस्विकविधिन्निरुत्यैवावगमात्॥ एवं स्वाधिकारः॥ यदा तु पित्राद्यधिकारिकं श्राद्धं गुर्वादिः पौरि
नः करोति तदा मुक्तस्य यजमानस्यापि पितृमातृपत्नीभ्रातृणामित्यादिप्रयोगो द्रष्टव्यः॥ सर्वत्र परप्रेरितेनुगमसंभवात्॥ पित्रा
दिसंबंधविशेषोल्लेखे प्रमाणाभावात्॥ संबंधानुल्लेखे च श्राद्धस्वरूपाभावात्॥ पित्रादिपदेन मंत्रलोपादिविध्यननु
मतबहुविप्लवप्रसंगाच्चेति॥ एवं जीवत्पितृकस्य मातामहादिश्राद्धेऽ(धि)का रे सिद्धे यद्यविभक्ता द्वित्रा भ्रातरस्त
दा वार्षिकादौ मातापित्रादिश्राद्धमेक एव कुर्वीत॥ यदि तु विभक्तास्तदा पृथक् कुर्युः॥ यथाह मनुः॥ भ्रातृ
णामविभक्तानामेको धर्मः प्रवर्तते॥ विभागे सति धर्मोपि भवेत्तेषां पृथक् पृथगिति॥ प्रदीपे॥ विभक्तास्तु पृथक् कुर्युः
प्रति संवत्सरादिकं॥ एकेनैवाविभक्तेषु पुत्र ते सर्वे स्युः कृतमिति॥ तत्रापि ज्येष्ठ एव कुर्यात्॥ ज्येष्ठेन जातमात्रेण पु
त्री भवति मानव इति मनुना ज्येष्ठस्यैव पुत्रकार्यकरत्वोक्तेः॥ ज्येष्ठाशक्तौ यदा तु कनिष्ठोपि तदनुज्ञया कुर्यात्॥
यदा तु सापत्न्या भ्रातरस्तदा वैमातृके ज्येष्ठेपि सति कनिष्ठ एव स्वमातृवार्षिका(दिश्र)द्धमादि स्वमातामहवार्षिकं भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्यात्॥ मुख्यपुत्रसत्त्वान्मुख्य एवेति गृहे तत्राप्यमुख्याभावे तत्सपत्नीपुत्रेष्वन्येष्वेव कुर्यात्॥ एकोद

विभक्त दिष्टवत्॥ यद्यप्यविभक्तेष्वपि [illegible] कस्याधिदेव सुतसंस्कारः स्वद्वितीयापुद्वाहौ च ज्ञातिवादकृतमि

नदंग हेनोपतिष्ठते तदा स एव वृद्धिश्राद्धं कुर्यात्॥ तन्मातृकर्तव्यत्वेनेतरेषां प्राप्त्यभावात्॥ तीर्थेत्वविभक्तेष्वपि

यद्येकैको गच्छति तदा स तीर्थश्राद्धं कुर्यात्॥ तीर्थप्राप्तेर्निमित्तस्य जातत्वेन नैमित्तिकावश्यंभावात्॥ सह तु सर्वेषां गमने ज्येष्ठ

एव कुर्यात्॥ एकेनैवेष्टस्येष्टत्वविशेषात्॥ यदा तु पित्रा सह पुत्रास्तीर्थं गतास्तदा पुत्राणां न पृथक् तीर्थश्राद्धं॥ पितुरेव

जीवितेनास्वातंत्र्यात्॥ यदा वैश्वदेवेपि तदुपजीविनां देवनाधिकार इति वक्ष्यते तद्वदिहापि॥ तत्रापि पितुरशक्त्यादौ तत्प्र

तिनिधित्वेन भवत्येव॥ यदि तु पिता तीर्थेस्ति पुत्रश्च तत्र गतस्तदा स्वातंत्र्येण निमित्तस्य जातत्वात् कुर्यादेव न तदुपजीवना

संभवात्तीर्थश्राद्धं पुत्रः कुर्यादेव॥ यथा देशांतरगते वैश्वदेवं कुर्यादिति वक्ष्यते तद्वदिहापि॥ एवमेव ज्येष्ठभ्रातर्यपि तीर्थंगते

कनिष्ठस्य तत्र गमने श्राद्धप्राप्तिर्द्रष्टव्या॥ विभक्तानां पृथक्त्वपरस्य रं सहापि पित्रा सह तीर्थं गतेपि तत्रैवातीर्थं गतेन मप्रागुप तक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ × येषां पिता महः कुर्यात्तेषां कुर्यात्सितरि पितामहे प्रपितामहे च जीवति ×

च नात्पृथगेव तीर्थश्राद्धं॥ सन्यस्तादिपितृकाणां त्वमावास्यादिश्राद्धान्यविभागे ज्येष्ठेनैव॥ विभागे तु सर्वैः कार्याणीति
प्राग्भुक्तं॥ अयं च विभागाविभागयोरुक्तो निर्णयस्तीर्थेणे समानो ज्ञेयः॥ मात्रादेर्योर्द्ध्वरेतिहके तु विभागे विशेषो
वक्ष्यते॥ एवं तावज्जीवत्पितृकस्यापि पितृश्राद्धाद्यधिकारः सप्रकारो निरूपितः॥ जीवत्पितृपितामहकस्य तु पिताम
हेभ्य श्राद्धाद्यधिकारो जीवत्पितृपितामहप्रपितामहकस्य तु नैदृश्येमधिकार इति विज्ञानेश्वरः॥ जीवत्पितरि यः श्राद्धं कुर्या
द्येषां पिता कुर्यात्तेषां कुर्यात्पितरि पितामहे [illegible] च जीवति नैव कुर्यादिति॥ अनेन वृद्धितीर्थसन्यस्तपितृकेनापरो
जीवत्पितृकस्यैव वृद्धितीर्थसन्यस्तपितृपितामहकस्यैवेरो जीवत्पितृपितामहकस्यापि पितामहेभ्य श्राद्धं भवती युक्तं भवति॥
७पि तृभ्यः पितामहस्य पितृपितामहप्रपितामहेभ्य इति सवशब्द प्रयोगो नियमः प्राग्व्युक्तं तव्यः॥ प्रपितामहे जीवति तु ततः परे
भ्यो देयमिति विज्ञानेश्वरमतं॥ तम्भो गिरिरयमसुक्तं निगमे॥ येभ्यो वापि पिता तेभ्यो दद्यात्स्वयं कर्मणि॥ इत्यास्त्रिभ्यः
परेभ्यस्तु जीवेदत्रिन्नयं तरेति वैतानकर्मणी सुपलक्षणं॥ एवं च विकल्पः सिद्धः॥ इह च मातामहानामप्येवं श्राद्धं कु
कुर्यादिति च लक्षणं संतेन विज्ञानेश्वरमातामहे चापिश्राद्धमानरि जन्मियमानयो मातृपितामहप्रपितामहेभ्यो

पितृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२न

रेयमिति पृतीयेनेत-जीवत्पितृकविशेषं ॥ एवं शब्दयुक्तस्यां निर्देशवाक्यस्य येभ्यः पिता दद्यात्तेभ्यो दद्यादित्यादेः सा
साद्दृश्याय कथा सतेवीं ध्यातः ॥ ननु मृतपितृकविशेषं ॥ इह च येषां मते अनुक्रममृतस्य सपिंडीकरणं नास्तितेषां मते यथा पित
रि मृते पितामहे जीवति पितुर्वार्षिकमेकोद्दिष्टमेव ॥ अमावास्यादौ तु पितामहस्य पित्रादिना पार्वणं ॥ यस्य पिता प्रेतः स्यात्स
पित्रे पिंडं निधाय पितामहात्परमाभ्यां द्वाभ्यां दद्यादिति विष्णुवचनस्य पितुः पितामहादिभिर्व्याख्यानांगीकारात् ॥ न चानुत्पन्नस्या
पनयजीवत्पितृकस्य मातरि मृतायां पितामह्यां जीवंत्यां मातुर्वार्षिकमेकोद्दिष्टमेव कार्यं ॥ तीर्थश्राद्धादौ तु पितुर्ये दद्युस्तेभ्यो दद्यान्
मे पितुः पितामह्यादिभ्य एव दद्यादिति सिद्धांतः ॥ अन्ये त्वाहुः ॥ एवं सति नस्य गयायाम न्वष्टक्ये च मातुरेकोद्दिष्टं प्राप्नुयात् ॥ अन्वष्ट
क्यं गयायां प्रेतपक्षे सांयत्र मृतेऽहनि ॥ मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवतीति ॥ मातुरेव श्राद्धविधानेन पितुः पितामह्यादीनामप्राप्तेः ॥ न
चवा न्यमास्तामेवमिति प्रापकाभावात् ॥ अमावास्यादिविकृतनेष्वन हि सर्वश्राद्धे पार्वणता प्राप्नोति ॥ सा च एकोद्दिष्टप्रकृतितमाता पि
त्रोः सपत्नी मातुरिति विशेषस्य ॥ अनन्तरवेद्युत्क्रममृतमातादि सपिंडीकरणं वक्ष्यमाणे नावश्यकमिति नश्यत्यादिकाः ॥ तस्मा
त्पितरि मृते पितामहे जीवति पितुः पिंडं दत्वा स्वपितामहात्परमाभ्यां द्वाभ्यां पिंडौ दद्यादिति सर्वं पार्वणविशेषविधिरिति आरभ्याभंगीकृ
त्य समानन्याय तया मातर्यपि श्राद्धेऽयमेव पितुः पितामह्यादिप्रपितामहीभ्यां दद्यादिति ॥ एवं पितामहप्रपितामहयोर्जीवतोः पितरि मृत
त्वं पितामही प्रपितामह्योर्जीवतोर्मातृमरणेऽपि द्रष्टव्यं तो वगंतव्यं ॥ इदानीमान्वष्टक्ये विशेषो ऽभिधीयते ॥ तत्रान्वष्टका चतुष्टय
मुक्तमाश्वलायनेन ॥ हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इत्युक्त्वा परेद्युरन्वष्टक्यमिति ॥ पंचम्यपि तेनैवोक्ता
एतेन माघावर्षं पघाज्ञपरपक्ष इति मध्यवर्षास्वश्यादिषु मघाभिमर्थः ॥ माघ्यावर्षमिति पाठ तु संदेह्यं ॥ इयं च पद्मपुराणे प्रो
श्रो

23

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ २ वैत्री
९ ९

का ॥ दौपचर्यका भूयः पितृलोके भविष्य तीति पितृणां वचनात् ॥ एवं च जीवत्पितृकस्य यस्य ... का अवस्थानुष्ठेया सापि पितृकरवे
व ॥ यदा तु सं राज्ञि स्तद पंचम्यावस्यकी ॥ सर्वासामेव माहृणां श्राद्धं कन्यागते रवौ ॥ नवम्यां द्विपुरातव्यं ब्रह्मल्ल भ्यवरा
यनज्ञनिस्मृते नावश्यकत्वस्मरणात् ॥ सर्वासामित्युक्ते दंसिध्यति ॥ यद्यपि मातृश्राद्धस्य ॥ ड ननन्यामेव गुरुस्वत्वा न्व एकस्य विधितः ॥
सपत्नीनां न पृथक्त्व श्राद्धं पितृभ्योप्य वर्षीयस्युमिति ॥ तेन स्वमातरि सत्तामपि ना भ्यो स्या त् ॥ तस्यामृतायां च तत्सैवताभ्य भ्यर
यात् ॥ तत्र चासां वियोगे स्मिंस्तेसर्वासानामपि निर्देशनेकस्मिन् ब्राह्मणे द्वयोः पिंडे वा वाहनादिकमुपमन्त्वा ॥ एकत्वा मत्रे वचनेन बहुवचन बहुवचनं या
अनेसामिः प्रयाणविशेषो नारण्य सूत्रादिभ्यो वगंतव्य ॥ इह च यद्यपि जीवन्मातृपितृक अपर पिंडपितृयज्ञ वक्ष्यः पितृभ्यो रसो तान्ते
चमातामहान्तरापितुः पित्रादित्रिकाय स्वास्वमातृत्रिकाय स्यात् ॥ अन्वष्टकासु वृद्धौ च गयायां च क्षयेहनि ॥ आत्र मातुः पृथक् श्राद्धमन्यत्र पति
नासहनि आग्निपुरामोमाहूणामुपयुक्तमित्युक्तमपि ॥ पुनर्भोक्तराज्ञ नपितामहैः श्राद्धं कार्यं यथाविधि ॥ तथैव प्रपितामहैर्वैश्वदेवपुरःसर
मितिपुनर्मात्रादिकीर्तनस्यैवमर्थत्वं अन्तरिक्तपृथात्वनाभावात् ॥ मातृमरणे पितामहीनां जीवने च प्रागुक्तमेव ॥ पिंडपितृयज्ञे विशेषो निरूपतः ॥
तत्र जीवत्पितृकस्य होमांतमनारंभो वेति कात्यायनेन पक्षद्वयमुक्तं ॥ परिशिष्टे परंपक्षद्वयमुक्तं ॥ होमांतं पितृयज्ञः स्यात् जीवे तु पितरि जानतः ॥
पितरं ओलग्य ह्यावापि जीवनि एणुयावरो ॥ येभ्यः पिं ... गर्भिताद्याब्भ्यः पुत्रोपि वारयेत् ॥ न द्राजीवत्पितारद्याग्निष्पोंगमी श्रुतिरिति ॥ ए
वं जीवत्पितृपितामहेरपि द्रष्टव्यं प्रावत् ॥ यानि चपिंडपितृयज्ञविधानैव कुर्तव्येनो तानि तेषां पिंडपितृयज्ञविकृतित्वात्तद्वदेव प्रयो
पिपसागृहूभ्वा ॥ यदा चापिंडपितृयज्ञाकरणं तदापि सन्यसाग्निपितृकस्यामातुरस्याग्निश्राद्धं स्मार्ते पृथगाग्नौ करणमेव हेवा ॥ स्मृतीनां
सावारण्येन प्राप्तकत्वात् ॥ सामिकत्ता मातृविषय ब्रूपस्त प्रादतिरस्तरदा ॥ यत्तु दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं ॥ न जीव
स्तु

कृ. ६
नै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्नित्रयकः कुर्यात्तिलैस्तर्पणमेव चेति कौण्डिण्यवचनम् ॥ इतराभ्यनुज्ञा पूर्वं संगारवप्रवृत्त व्याख्येयं ॥ शौरि पर्यरसि केपि दर्शपितृयज्ञाग्नि
धिनानकुर्यादिययाश्राद्धं तद्दर्शेनगत्वा न कुर्यादिति ॥ यद्वा दर्शश्राद्धं पिंडपितृयज्ञं अनरेभपसे कृतात ॥ अपरपक्षकर्मानि तिनिय
निषेधवाधेनप्रसक्तं काम्यापरं पक्षिकं ॥ अथ जीवत्पितृकस्य वैश्वदेवविचारः ॥ तत्र यद्यविभक्ताः पित्रा सह पुत्रास्तदा पुत्रार्थ
प्रेपि वैश्वदेवस्य तेषां पितुः पत्नी विंत्तेन स्वातंत्र्याभावस्तत्संस्कार तात्रयैथं च भवति ॥ अविभक्तानामपि देशांतरगमने तु कार्य
९स्कृ जितापृथक्पाकत्वेन स्यात्तेन न नश्योन्य थाकिन्वषी भवेदिति कात्यायनेन दोष श्रवणात्संस्कारार्थं वैश्वदेवं कर्तव्यमि ति पर्न
९प्र निके वित ॥ अन्ये तु ॥ वैश्वदेवास्ते भवेत् कुर्याद प्रमाणात् ॥ अन्नं मनैनासंप्रकृष्य किल्बिषा नुपभुज्यन इति स्मरणात् ॥ एतन्मूत एतन्मूत
पितृकस्य वैश्वदेव करणं नैतरे पाकांतरप सहैव जीवत्पितृकस्य सहणं वनेतिव दंति ॥ विश्वेदेव प्रापक भावस्य तुल्यत्वात् ॥ पित्रा
पक्षे सहपि भागपृथक्त्वे तु वैश्वदेवो भवत्येव विभक्तानां भिन्नधर्मत्वाजकत्वात् ॥ वैश्वदेवं च यदा लौकिकाग्नौ पाकस्तदा तत्रैव ॥ यदि
तु तस्मात्तिग्नौ तदा तदपि तत्रैव भवति ॥ यदि स्या लौकिके पाकस्त तो जनं तत्र हूयते ॥ शालाग्नौ तत्र पक्वं विधिरेष सनातन इति
कुर्मपुराणे वचनात् ॥ यस्य चैवं वैश्वदेवं जीवत्पितृकेण कर्त्तव्यमिति सिद्धं तदा अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्युपक्रम्याश्व
लायन वचनेदेवभूतपितृयज्ञानामुक्तत्वात्तेषु स्वधा पितृभ्य इति पितृयज्ञस्य सर्वशाखा प्रत्यया न्यायेन शाखां तरोक्त मनुष्येपि
तृदेवसहत्वेन नित्यश्राद्धरूपं प्राप्तिस्तस्य च जीवत्पितृक प्रतिनिषेधात् पञ्चभूतयज्ञा एव भवतः ॥ यस्तु पितृयज्ञस्य स्वतंत्रतान
नित्यश्राद्धत्वं तस्मिन्पक्षे मनुष्यपितृसंबंधि कर्मविषयत्वाभिधानान्निषेधस्य देवपितृसंबंधि कर्मविषयत्वात्स्वान ब्रह्म यज्ञानंत
पितृकस्य रमाविनर्पणादावित्र पितृयज्ञे पितुस्साधिकारः सिध्यति ॥ सन्यस्ताद्रिपितृयज्ञस्य नित्यश्राद्धेपि पितृपित्रादिसंबंधेन कर्त्तारस्यैव ॥

त्रम दृ पि प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माता पित्रोरितरद्दृव्यगतमपि साहित्यं विवक्षितं॥ ४

कस्यचित्तु पित्र्यहाभावेऽपि जीवत्पितृकस्य विशेषविधानादेव न तत्राधिकारः॥ नाभिमात्रे जले गत्वा कृत्वा केशादिधार्यं [illegible] जइति सामान्येन स्ना
ने केशश्मश्रुधारणं विधाय जीवत्पितृकस्य॥ जीवत्पितानकुर्वीत रश्मिणेकरास चयानिति पुराणे विधानात्॥ तथैव स्मृत्य॥ देशीस्ना
न कुर्वन् मातापित्रोस्तु जीवतोः॥ पुत्रः कुर्वन्निराज्येष्ठपित्रोर्हन्ति जीवनइति योगयाज्ञवल्क्यवचनात्॥ इदं चैषां नोदकस्नान
विशेषं इति शिष्टाः॥ उदकस्नानविधिरिति मार्गविषयतस्यैव संभवात्॥ मृतपितृकस्य सर्वत्राधिकारात्॥ तेन एकैव जीवने नि
षेधाप्रवृत्तिः॥ तीर्थाभावे तु करुणं मुण्डनं कपरतीर्थेरिति नियमवचनस्य नैमित्तिकविषयत्वेन बलवत्त्वात्॥ एवं ग्रहणादिस्नानस्यापि
नैमित्तिकत्वेन बलवत्त्वमूह्यं॥ विस्तरभयान्नेह प्रपञ्च्यते॥ नैमित्तिकवदेवच काम्येष्वपि बलवत्त्वमूह्यमिति संक्षेपः॥ यथा चरसः॥
मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः॥ न जीवत्पितृकः कुर्याद् गुर्विणीपतिरेव चेति॥ मुंडनं शिरोमुंडनं॥ पिंडदानमेकोद्दिष्टपार्वणभेदे
न पिंडस्य पिंडदानं वा स्यात्॥ सर्वशः सर्वप्रेतकर्म प्रेतसंबंधिकर्म तेन प्रेतस्य दहन[illegible] दाहादिकारी निन भवंति॥ मुंडनं चरागप्राप्तं सुरवा
निर्धर्मप्राप्तिविदं॥ सामान्येऽधि प्राप्तमपि च॥ यथा [illegible]नुमती नांच परिवापनमिति आपस्तंबोक्तं मृतादल्पवयसां मुंडनं॥ इदं हि सामान्यं
जीवत्पितृकस्यातिरिक्तविषयत्वेनाप्युपपन्नं॥ यत्र तु नित्यं नैमित्तिकं काम्येषु वपनं विहितं तत्र भवत्येव॥ तत्र नित्यं मुंडनं॥ यथा चौपनयनव्रतादि
सर्गेषु आधानदर्शपूर्णमासज्योतिष्टोमादिषु॥ नैमित्तिकं यथा तीर्थप्राप्तौ स्वेतमरणादौ वा॥ काम्यं काम्यज्योतिष्टोमादियत्नेषु काम्यती
र्थयात्रादौ च॥ न च तेषां धारणं जीवत्पितृका[illegible]तिरिक्तविषयत्वं वाच्यं॥ चौलादीनामेवान्यविषयत्वे तस्य चौलादिविध्यंत ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

26

२८

राभावेन संस्काराभावप्रसंगात्॥ वपनमात्रस्य तु अन्यविषयत्वे निषानिषसंयोगविरोधात्॥ नैमित्तिककाम्ययोस्तु गंगायां च मुंडनयोर्निषे
धे दौर्बल्यीयस्त्वाधिक्यात्॥ श्रुतिविहिते च मुंडने अप्राप्तेन स्मार्तेन निषेधादौर्बल्यीयस्त्वाधिक्यात्॥ गंगायां भास्करक्षेत्रे मातापित्रोर्गु
रोर्मृतौ॥ आधाने सोमयाने च वपनं सप्तसु स्मृतम् इति निगमवचनाच्च॥ इदं हि तीर्थादौ वपनसामान्यविधिनैव वपने प्राप्ते वेष्यष्यर्ण
पत्न्यर्थमेकेन चिल्ली वपितृकगुर्विणीपतिनाहिनिमित्तेन वपननिषेधप्रसक्तिस्तत्र पूर्वोक्तन्यायसिद्धप्रतिप्रसवानुवादार्थं तद्विधाना या
र्थं वा॥ अत एव स्मर्यते॥ सौरे नैमित्तिके कार्ये निषेधे सत्यपि अप्र यं अपि गर्भे मृतदारस्यास्सु प्रायश्चित्ते च नीर्थकरोति॥ निषेधे सत्यपीसु
के प्रतिप्रसवः सिध्यति॥ गंगायां भास्करक्षेत्रे इति तीर्थयात्रोपलक्षणं॥ उभयोपादानं तु तीर्थे मुमुक्षत्वात्॥ विना तीर्थं विनायज्ञं मा
तापित्रोर्मृतिं विना॥ यो वा वपति लोमानि स पुत्रः पितृघातक इति॥ स्मार्तिकं विधायादौ तीर्थे मुंडनामाचरेदिति च संगतं वचनात्॥
परत्वेऽपि विशेषेणोपसंहारविषयत्वात्॥ सामान्यस्य गंगायामिति विशेषेणोपसंहार इति वाच्यं॥ सामान्यप्रतिप्रसवार्थत्वेन गंगायामिति विशेषस्यापि सामान्य या
स्मृतकस्यापि मातृमरणे मुंडनप्राप्त्यर्थं॥ गुरोर्मृतमिति क्षेत्रजस्य काम्यविषयं॥ संग्रहवाक्ये तु मातामहादेरपि शिरोवपनमेवविवक्षितं॥
जीवपितृकशिरोवपने स्वशिशानां विगानाच्छिष्टाचारणास्य तत्रैवोपसंहारात्॥ एवं सौरं तु कृतमिति वपनमिति च शिरोवपनमेव द्रष्टव्यं॥
यत्तु कुंभे कर्कटके चैव कन्यायां कार्मुके रवौ रोमखंडनं हन्ता स्वपितृन् प्राशयन्नेयमद्रं इति सुमंतुवचनं तद् न कर्तव्यं धारणनिषेधकं॥ १९

४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२ तत्प्रहस्यग्रहणा यथाब्रह्मचार्यादिकं नास्कंदतत्तथापितद्ग्रहणात्स्त्रीपतितकमपीति कश्चित॥ अन्यतु पितृत्र्यादूस्यापित्रादिपर्यंतलक्षणापत्तेः
पितृभावापत्तिपरत्वेन तत्प्रयपिपितृणांसत्वादततत्वदन्तिरविशेषमाहुः॥ पिंडदानं त्वित्यत्र स्त्रीवपितकस्यापिंडपितृयज्ञ हांमांतपक्षपिंड
दानाभावात्सादृश्यं॥ यद्वा यत्न श्राद्धसंभवपिंडदानमात्रमुक्तं यथादेवलेनपिंडमात्रप्रदानमप्रभाव दृष्टविप्रयाः॥ श्राद्धाहनितुसंप्राप्ते
भवेन्निरस्तानापिवति॥ यथाचदेवीपुराणे॥ तीर्थश्राद्धविधिनेवपिंडदाने प्राप्ते पुनःपिंडदानं तु मध्यस्तपितृणांच्येवनक्षमितितत्रस्त्री
वपितकस्यापिंडदानपक्षोनभवती यथमर्थः॥ तर्पणपक्षस्तुतिलैः सम्प्राप्तनिर्वापिसममतजलांजलिं॥ भक्तिनम्रःसमुद्दिश्यभुम्रसस्याक्
प्रदास्यतीतिपितृकश्राद्धाराकं प्रस्फुक्तत्रापिभवयथा॥ वृद्धौतीर्थेच सन्यस्तानांतच पतितानसति॥ यथाएवपितादद्यात्तथापादद्या स्वयं
सुतइतिस्मृतिसंग्रहवचनेन दद्यादित्यस्यतत्प्रतिजलांजलिदानरूपतर्पणेप्यविशेषेण विशेषणनिषेधाभावात्प्रवृत्तेः॥ तर्पणपितितस्वास्तस्यनश धा
वति॥ नस्त्रीवपितकः कुर्यात्तिलैः कृष्णैश्चतर्पणमिति लौगाक्षिवचनात॥ अनेनैवतु प्राप्तस्यपिंडदानस्य हानिरुपधुइति॥ अथवास्त्रीवपितकस्य 12
यानिश्राद्धानिनांदीश्राद्धं तीर्थश्राद्धं सन्यस्तादिपितृकस्यामावास्याश्राद्धं ग्रहणश्राद्धमित्यादीनि तेनपिंडदानेन सापिंड्यमेव न मथमेनतत्र॥ श्रीसंवंद॥ १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा अतीपातसंक्रांत्यादिश्राद्धानि पिंडरहितानि तथैतदपि। पिंडदानराहित्येन तत्समुच्चरितानामन्येषामपि राहित्यं स्यादिति॥ पिंडयज्ञनिवर्तनमप्यादिषु
कथंचन॥ सोऽनुतद्दिकार्यनियमाद्धुक्षवाद्विभिरिति छागलवचनात्॥ संकल्पस्वरूपनिषेधनात्॥ आवाहनं स्वधाशब्दं पिंडनाहरणं तथा॥ विदि
रपिंडदानं च संकल्पं पाद्धैव जयेदिति॥ स्वधास्वधाक्षतामिति॥ पिंडशब्देपिंडः॥ पिंडदानस्वरूपानुपादानात्॥ यत्तु महादिने यज्ञसामयोगं च पिंडदानं तत्र
तन्निषेध ॥ विषयः॥ प्रतिप्रसवत्वा प्राप्तवचनं चस्मार्तनिषेधाद्बलवत्वात्॥ प्रेतकर्मानित्तसंघातगते श्वेव सादि पुत्रसगोत्रादिसमस्तसगोत्राद्य
भावपि च जीवत्पितृकः सगोत्रासगोत्रप्रेतस्य दहनालंकरणादि सपिंडीकरणांतौर्ध्वदेहिकं च न कुर्यात्॥ नच प्रेतकृपस्यापि तत्कृपवाश्चेदव जीवत्पि
तृकप्रतिनिषेधास्तितत्कृ॥ प्रेतकर्मसामान्याभावेन च। तत्सापितृकृपतत्वाभावात्॥ सपिंडीकरणं तत्र श्राद्धाहिपितॄनावाप्नोति॥ अतस्तद्दुत्तरभावविनाभवा
भावास्यादिश्राद्धानामनावापितृकृपं न ततस्त्यैतानां॥ अतएव मार्कंडेयेन सापिंडीकरणमुक्तं॥ अतः प्रभृतिवै प्रेताः पितृसामान्यमश्नुत इति॥ अयं च
जीवत्पितृकस्य पिंडदानप्रतिषेधो मातुरन्यत्रेत्यर्थः॥ यत्र तु मातृश्राद्धमाम्नातं॥ यथामैत्रायणीयपरिशिष्टे॥ अन्वष्टक्यगयाप्रेतोऽसमाय
क्षयमृतेऽहनि॥ मातुःश्राद्धं सुतः कुर्यात्पितर्यपि च जीवतीति॥ तत्रापि पिंडदानं नववर्षविषयमेवेति॥ अन्वष्टका सु चान्येषां श्राद्धं कार्यं तथैव च स्वपत्न्याः॥
पिंडनिर्वपनं कार्यं तस्या नादिनसम्मतं श्राद्धविधानेन पिंडदानं प्राप्त पुनस्तत्र तेन स्वपदाप्यस्य च पिंडादानं निषिद्धं तदा तस्य च न तत्प्रा स्पर्शेनात्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथा अग्निपुराणे॥ न कालादि गयातीर्थे दद्यात्पिंडं श्वपि प्रया इति पिंडदाननियमकीर्तनस्य कालकर्मादिघटित पिंडदाननिषेध प्रतिप्रसवार्थत्वात्॥ यत्नात्राप्यात
य पिंडं तत्रैव तु प्रशस्यते इति गायत्र्यादिवाक्य गयायां पिंडदान प्राधान्यावगमाच्च॥ तथा वृद्धस्मृतौ॥ पिंडदानं प्रकुर्वीत मातापित्रोः क्षयेहनि इति
उत्तपि पार्षिकश्राद्धेन न सिद्ध पिंडदानानिषिद्ध कालकर्मादि प्रतिप्रसवार्थत्वेनैव तस्यात्वात्॥ अत्रात्मादिनासपिंडश्राद्धकरणस्य सर्वसाधारणं॥ एवं च यदा
जीवत्पितृकामातुरन्वष्टक्यादावन्यत्पिंडदानमात्ररूपमनुकल्पं कराति तदा कश्चिन्मतं प्यत्र तत्र निषेधान प्रवर्तते। पिंडदानस्यावश्यकत्वात्॥ अतः॥
इदं च जीवत्पितृकस्य पिंडदानं संग्रहे॥ विवाहव्रतचूडासु वर्षमर्धं तदर्धकं॥ पिंडदानं मृदास्नानं न कुर्यात्तिलतर्पणम् इति निषेधविषय विवाहानंतरं स
वत्सराः तत्रैव॥ महालये गयायां च मातापित्रोः क्षयेहनि॥ कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सदा इति साधारण्येन प्रतिप्रसूतत्वात्॥ अपि च द्वि
नोपनयनादरपि ग्रहणं॥ मृताहश्राद्धं च सपिंडीकरणात्तरभावि मातृमासिकमपि जीवत्पितृकस्यापि पिंडदानं प्राप्तं॥ सपिंडीकरणादूर्ध्वं यदा
कुर्यात्तदा पुनः॥ प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्सुतोप्यपि इति षठणसिस्मरणात्॥ यत्र च जीवति पितरि माता म्रियते तत्र मातुर्द्वादशाहात्सपिंडीकरणांतं
प्रेतकर्म पुत्र एव कुर्वीत॥ पित्रोः पुत्रेण कर्तव्या पिंडदानोदकक्रियेति शंखोक्तेः॥ पुत्राभावे सपिंडा मातृसपिंडाः शिष्याश्च दद्युरिति गौतमवचनात्पुत्रपुविध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानेषु नान्येषे नाचेयस्वधामिति कृष्णभंगस्मरणाच्चाच्चय अतिरकांपं पुत्रस्यनाधिकारावगमात्॥ यद्यपि विधिजीवन्मृतादिनकविषय
निषेधश्च मातृतदतिरिक्तविषयइति सामान्यविशेषभावस्तः तथापि विधिरेवबलवत्वात्॥ पुत्रस्यमुख्याधिकारित्वात्ः बाधकत्वनियामक
त्वात्॥ जीवत्पिता पितामह्याद्या मातुः कुर्यात्सापिंड्यं॥ प्रमीतपितृकः पित्रा पितामह्यापि वा सुतः॥ पादिपमाद्यश्च नानुरोधात्॥ सापिंडतादिग
उणं तद्देतप्रेतकर्मोपलक्षणार्थं॥ इदं च जीवत्पितृकस्य मात्रादीनां द्वादशाहादिसपिंडीकरणांतं प्रेतकर्मविभक्तपुत्रात्पुत्रस्य पुनर्वचनानुकृतं आपिति
आद्धनिर्णये नैवबाद्धं अविभक्तं ब्रापितृसर्वेषां धनमेकीकृत्य ज्येष्ठेनैव कार्यं मातृविशेषः॥ नवश्राद्धं सापिंडवं आद्धान्यपि च षोडश॥ श्री॥
एकेनैव तु कार्याणि संविभक्तधनेष्वपीति स्मरणात्॥ सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं॥ द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्॥
इति मरीचिस्मरणाच्च॥ सा पुनर्भात्रा विभक्तश्चापि स्वस्वमातुः सुतः पुनः कनिष्ठोपि कुर्यात्॥ श्राद्धमिपत्तद्विषयत्वात्॥ एवं स्वस्वमातामह
ह्यपत्यादिष्वपि द्रष्टव्यं॥ यदा तु ज्येष्ठस्य मुख्यासन्निधिः तदा कनिष्ठो गौणैरपि द्वादशाहांतमेव कर्तव्यं॥ एकादशाहादिसापिंडीकरणांतं तु ज्येष्ठस्य मुख्यास्मानं॥
असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्॥ प्रथमेहनि यो दद्यात्स दशाहं समापयेदिति॥ द्वपरिशिष्टात्॥ एकादशाहादिकर्मणो ज्येष्ठस्यैवाधिकारनियम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति प्रचेतसः स्मरणात्॥ सपिंडीकरणे मातापित्रोर्वसिते पुत्रः कालादपि चिरादपि वायुपुराणे पुत्रः शाद्वस्य मुख्य मात्वा मातुः सपिंडीकरणं
केन सह स्यादपेक्षितमीरव आह॥ मातुः सपिंडीकरणं कथं कार्यं भवेत्सुतैः॥ पितामह्यादिभिः सार्द्धं सपिंडीकरणं स्मृतमिति॥ मातरि मृतायां पिता
महीं जीवंत्यां सपिंडीकरणाभाव एवेति केचित्॥ मुख्यमनुप्रमीतानां नैवकार्यं सापिंड्यमिति स्मरणात्॥ अन्ये तु जगादिरा॥ भाद्धविधारात्तु दृषण
ग्रासादिदं वचनं दृशाविशेषविषयमादिवरं॥ तथापि मातापित्रोर्मध्ये च ॥ मुख्यमनु प्रमीतानां न सपिंडीकृतिरिष्यते॥ यदि माता यदि पिता मृतौ
६ नैव विधिः स्मृत इति॥ पत्नी स्त्री कर्तृक सपिंडीकरणनियमा। दूर्शांतरे तु पित्रादीनामपि सापिंडीकरणं भवत्येव। अन्यथा सापिंडीक
रणात्प्राक् जन्यापितृभावापत्तौ भावेन वार्षिकादि संप्रदानयोग्यताभावेन पित्रादिवार्षिकांतकरणप्रसंगात्॥ पितामहा वाच्य पित्रादि ह्रास्
यादिमंत्रलोपादि बहुवैषम्यप्रसंगश्चेति न च तेन विधेन वपितृभाव इति वाच्यं॥ अश्रोतादृष्टकल्पनापातात्॥ अपरे तु॥ मुख्यावधि सपिंडी
करणनिषेधो यो॥ तेन पश्चात्क्रमेण सपिंडीकरणं कार्यं॥ तावच्चापि त्राद्यादि ह्रासादि युक्तमंत्र सहितमेवा द्धं कार्यं॥ मासिकवत्॥ न च प्रेतत्वाद्यप्रसंगः
प्रेतत्वाद्यास्य गणनाद्यात्॥ यदा तु जीवाति तेकामातरुच्या कृतचूडा पर्णांत्रिव सरस्य तदा विशेषः॥ कात्यायनेनोक्तः॥ अनुपेतेन पन्याच ॥१७४॥

32

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रवितानंस्तमंत्रकं॥ कर्तृ प्रमितरस्तर्य दारयदन्यमवहीति॥ यदा तु कृतचूडः पूर्णत्रिवर्षश्च तदा हस्तु मंत्रः॥ अनुपेतानपि कुर्वीत मंत्रवर्जं तमधिकं॥
य घसो कृतचूडस्याघादिनास्यात्रिवसर इति॥ इदमुभयं जीवदजीवत्पितृकविषयं न साधारणमपि पुत्रप्रकरणे न पुत्रविषयं॥ प्राग्गुरु
न्यायेन वनिषध्वबाधकं॥ पत्न्यस पुत्रविषयं॥ यदा तु जीवत्पितृकस्य पुत्रस्य भार्या म्रियते तदा शंखवचनात्॥ भार्यापिंडपतिर्दद्याद्भर्ता भार्यापतये च यति॥
पे हीणस्त्रीनाच॥ अपुत्रायां मृतायां तु पतिः कुर्यात् सपिंडतामिति॥ अस्यापि साधारणत्वपि पुत्रन्यायेन बलवत्त्वे सपिंडनाग्रहणं न दंतापकृष्टानां॥

अत्र सपिंडग्रहणं न प्रतपीडावार्यकार्यं ऽश्च संग्रहीतं॥ ... यापुत्रग्रहणं मुख्यगौणपुत्रपौत्रप्रपौत्राभावपरमिति मन्तव्यं गतं॥ इहन्च मुंडन पिंडदा
न प्रेतकर्माणि जीवत्पितृकस्यान्यत्रापि भवंति॥ यथा पुत्र पितृमरणे अपुत्र सपत्न्यमातृमरणे अपुत्रमातामहमरणे च॥ भ्रातृणामेकजातानां मेकश्चेत्पुत्र
वान् भवेत्॥ सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥ सर्वासामेकपत्नीनामेकश्चेत्पुत्रिणी भवेत्॥ सर्वास्तास्तेन पुत्रेण पुत्रिण्यो मनुरब्रवीदिति॥ मनुवच

कुर्यात्
ने भ्रातृपुत्रसपत्नीपुत्रयोः पुत्रत्वाति देशात्॥ यथा व्रतस्थोपि सुतः पितुः कुर्यात् क्रियां सदा नरः॥ उदकाद्यामहाभावाहा दौहित्रापितृवाऽर्हतीति मत्स्यपुराणात्
दौहित्रस्य साक्षाद्पति देशात्॥ व्रतस्थ इति ब्रह्मचारी आरब्धव्रतश्च॥ पितुरिति मातृचार्योपाध्यायानामप्युपलक्षणं॥ अतएव याज्ञवल्क्यः॥ ... आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रतं कुर्याद्व्रतस्य समापनादिति आदिदेशो हि न ब्रह्मचारिणो व्रतस्य सामान्यतः पिंडोदकदानादि निषिध्य पित्रादिषु प्रतिप्रसवः कृतः॥
आचार्यपित्रुपाध्यायान्निर्हृत्य व्रती व्रती सकटान्नं च नाश्नीयान्न चतैः सह संवसेदिति॥ सरूपान्न यथोक्ते ... ध्यक्तं॥ स मातापितरौ दृष्टैक
शेषेण मातुरप्युपादानमिति विज्ञानेश्वरः॥ अतश्च अ नपितृकस्य जीवपितृकस्यापि ब्रह्मचारिणो मातामहस्य पिंडोदकदानाद्यधिका-
रः॥ न तु पितृमातृः प्रतिप्रसवाभावात्॥ अब्रह्मचारिणस्तु जीवपितृकस्यापि पितृ आदि पिंडोदकदानाद्यधिकारितं॥ एषां वचनानां प्रतिप्रसवार्थत्वात्॥
पृथाग्नतस्य स्यापित्रादिक्रिया अनन्यगतीनां दौहित्रस्य पुत्रमातामहस्य दत्तपिंडदानादिक्रियाणि सति ता सर्व्वा॥ जीवदज्जीवपितृकसाधारणा
न्यपत्यानि सापिंडादिधिष्यः पुत्रासन्निहिततरत्वा दूनवंतीति॥ यत्र च पार्वणे दौहित्रेणः सपत्नीकः ... पिंडदानादि कुर्यात्॥ तस्य साक्षा-
त्क्रियाविधानेन सापिंड्यदोषाभावे नच दुर्बलत्वात्॥ इतरस्य तु अतिदेशप्राप्तत्वात्सगोत्रत्वेन च दुर्बलत्वात्॥ मुंडनं तु न तस्य भवति क्रियायामाना-
धृतानां॥ भर्तुः सपत्नीपुत्रयोः सपत्नीपुत्रस्य सपत्नीपुत्र एवापिंडादिदद्यात्॥ पितृपत्न्याः सवर्णादानादि इति सुदंतुना तस्य साक्षाद्विशेषात्सर्वासां मकृ-
पत्नीनामिति मनुना पुत्रत्वो दशस्य॥ न चानयो दुर्बलत्वम् अतिदेशेन भार्या पिंडं पतिर्दद्यादिति तु साक्षाद्विधित्वेन बलवत्त्वादिति वाच्यं॥ श्री॥ ॥१२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टत्वाच अपुत्राभावे मनुना सपत्नीपुत्रस्य पाठात् भार्यापिंडाभिसस्य तदभावविषयत्वेनाप्यर्थवत्वात् ॥ सपत्नीपुत्रदौहित्रयोश्च समवाये सपिं
डत्वाविशेषेन बलवत्वात् सपत्नीभ्रातृपुत्रश्चोर्ध्वदौहित्रकाद्यधिकारिणो इतरस्याः सापिंडमात्रेण दुर्बलत्वात् ॥ अपुत्रस्य पत्नीभ्रातृपुत्रसमवाये
पत्न्येवोर्ध्वदौहित्रकाद्यधिकारिणी ॥ अपुत्रापुत्रवत्पत्नी कृशानसः स्मरणात् इत्युक्तमेव ॥ तत्र चतुर्थाहमेव सा कुर्यादितरः सूतपुत्र एव प्रागुक्तन्यायात् ॥
भिन्नविषयत्वात् ॥ भ्रातृपुत्रं स्वोप्यत्वं प्राग्वदुक्ता द्रष्टव्या ॥ एवं पुत्रास्तत्रिपाया पौत्राः पितामहा ऊर्ध्वदौहित्रकाधिकाराः ॥ एवमायुष्मती वगंतव्यं ॥
एवं मावजीवत्पितृकस्य मात्रा एकपिंडदानादावधिकारः सिद्धः ॥ कन्धिस्सा धारण्ये नाप्यधिकारः सिध्यति ॥ यथा सपिंड
मात्रमरणे वृद्धकस्तेय यतो प्राप्तवत्स्यत्यन्न ज्ञातय इत्यनुवृत्तौ सकृत्प्रसिंच्य उदकं नामगोत्रेण वाग्यत इत्युदकदानविहितं एवं माता
महाचार्यप्रेतानामुदकं क्रियेति मातामहादीनामपि मातामहोदकदानस्य जीवत्पितृकं प्रत्यपि प्रागुक्तन्यायेन प्रवर्तस्ताद्गुणपौर्वत्वाद्ब्रह्मचर्य यथा
ज्ञातीनामुदकदानमावश्यकं तथा मातामहादीनामुदकदानमपि सर्वागमात् जीवत्पितृकस्य ज्ञात्युदकदानावश्यकता गम्यते ॥ इदं च जीवत्पितृ
कस्य प्रेतोदकदानं सालिलं भवति ॥ अंजलिं सकृद्दत्वा सलिलं दक्षिणामुख इति स्मरणात् ॥ नचात्र जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणमिति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३६॥ निषेधप्रवृत्तिः॥ अस्पृश्यादकृतस्नानस्य तर्पणादिविधानाभावेन तर्पणलाभाभावात्॥ जीवत्पितृकस्य दशाहाद्याशौचं प्रेतस्य स्पर्शेऽपि चेत् दशाहाद्याशौ
चं भवत्येव॥ तस्य स्वस्याशौचस्य स्नाततिलतर्पणमरणस्पर्शनिमित्तकत्वात् तत्कृत्यलाभाभावेन निषेधाविषयत्वात्॥ गुर्विणी
पतिस्तु मुंडनं धिक्कमपि निषिद्धं॥ प्रेतवाहो दधिस्नानं वपनं पिंडपातनं विदेशगमनं चैव न कुर्यात् गुर्विणीपतिः॥ ५ इत्युक्तेः तासां स्नानं
नखकेशादिकर्तनं॥ अंतर्वत्न्याः पत्युः कर्म प्रजा जीवत्पितृकस्य मिश्रा ग्रंथत्र दर्शितात्॥ ६ ग्रंथमतविस्तारण॥ श्रीभट्टरामेश्वरसूनुश्री
भट्टनारायणसत्सूनुः॥ श्रीरामकृष्णः स्वाध्याय जीवत्पितृनिर्णयमत्र कार्यं श्राद्धं॥ इति रामकृष्णभट्टविरचितो जीवत्पितृकनिर्णयः॥

॥३६॥

KKSU LIBRARY RAMTEK 441 106 M1462 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=19.10.20 14:03
,TRANSFERRED=2020/10/19 at 14:08:40
,PAGES=36
,TYPE=STD
,NAME=S0004166
,Book Name=M-1462-JIVTIVKNIRNAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection